# RAMAKRISHNA MISSION VIDYAMANDIRA

(Residential Autonomous College under University of Calcutta)

**B.A./B.SC. FIFTH SEMESTER EXAMINATION, DECEMBER 2012**

**THIRD YEAR**

**SANSKRIT (Honours)**

Date : 20/12/2012

Time : 11.00 am – 3.00 pm

Paper : VI

Full Marks : 100

1. a) कस्यच**नैकस्य** प्रश्नस्योत्तरं लेख्यम् : [10]

 क) को नाम रुद्राध्याय: ? तत्र रुद्रदेवताचारित्रिकवैशिष्ट्यं यथालिखितं तद् यथामति समुपस्थापनीयम्। [1+9]

 ख) भूमिसूक्तं कस्मिन् वेदे वर्तते ? कस्येदमार्षम् ? सूक्तेऽस्मिन् भूमिमाहात्म्यं यथा प्रतिपादितं तत् समासेनोपन्यसनीयम्। [1+1+8]

Or,

 b) निम्नोद्धृतेषु यस्य कस्यचिन्मन्त्र**द्वयस्या**नुवाद: कार्यो वङ्गभाषयाङ्गलभारत्या वा। [5×2]

 क) शिवेन वचसा त्वा गिरिशाऽच्छावदामसि।
 यथा न: सर्वमिज्जगदयक्ष्मं सुमना असत्।।

 ख) यस्यां समुद्र उत सिन्धुरापो यस्यामन्नं कृष्टय: संबभूवु:।
 यस्यामिदं जिन्वति प्राणदेजत्सा नो भूमि: पूर्वपेये दधातु।।

 ग) या ते रुद्र शिवा तनूरघोराऽपापकाशिनी।
 तया नस्तन्वा शन्तमया गिरिशन्ताभिचाकशीहि।।

 घ) यां रक्षन्त्यस्वप्ना विश्वदानीं देवा भूमिं पृथिवीमप्रमादम्।
 सा नो मधु प्रियं दुहामथो उक्षतु वर्चसा।।

2. a) **एक**स्य प्रश्नस्योत्तरं लेख्यम् : [10]

 क) 'स एकया पृष्टो दशभि: प्रत्युवाच।' —क: केन कया वा पृष्ट: ? पृच्छा किंविषयिणी ? किमासीदुत्तरम् ? [2+1+7]

 ख) '....राजानमुपससार पुत्रो मे जायतां तेन त्वा यजा इति' — राजपदेनात्र कस्य परामर्श: ? अस्मत्पदवाच्यश्च क: ? तस्य पुत्रस्य नाम किम् ? उद्धृतांशे या प्रतिज्ञा कृता सा किं सम्यक् परिपालिता ? — पाठ्यांशानुसारं सर्वं समासेनोपन्यसनीयम्। [1+1+1+7]

Or,

 b) यस्य कस्यचिदनुच्छेद**द्वय**स्यानुवाद: कार्यो वङ्गगिरा आङ्गलवाण्या वा। [5×2]

 क) मनवे ह वै प्रात:। अवनेग्यमुदकमाजह्रुर्यथेदं पाणिभ्यामवनेजनायाहरन्त्येवं तस्यावनेनिजानस्य मत्स्य: पाणीऽआपेदे।

 ख) स ह तावत्तावदेवान्ववससर्प्प तदप्येतदुत्तरस्य गिरेर्मनोरवसर्प्पणमित्यौघो ह ता: सर्व्वा: प्रजा निरूवाहाथेह मनुरेवैक: परिशिशिषे।

 ग) नानाश्रान्ताय श्रीरस्तीति रोहित शुश्रुम।
 पापो नृषद्वरो जन इन्द्र इच्चरत: सखा चरैवेति।।

 घ) तस्य ह त्रय: पुत्रा आसु: शुन:पुच्छ: शुन:शेप: शुनोलाङ्गुल इति। तं होवाच — ऋषेऽहं ते शतं ददाम्यहमेषामेकेनाऽऽत्मानं निष्क्रीणा इति।

3. यथेच्छ**मेकस्य** प्रश्नस्योत्तरं प्रदेयम्। [10]

 क) बृहदारण्यकोपनिषद: कस्मिन् वेदेऽन्तर्भाव: ? कथमेवमभिधानमस्या: ? एतदनुसारं जीवात्मन उत्क्रान्तिपद्धतिरालोचनीया। [1+1½+7½]

 ख) ''...येनाहं नामृता स्यां किमहं तेन कुर्याम्, यदेव भगवान् वेद तदेव मे ब्रूहीति।'' — उद्धृतांशेऽस्मिन्नस्मत्पदेन का परामृष्टा ? भगवत्पदेन च क: ? यल्लक्ष्यमत्रेप्सितं तत् केनोपायेन लभ्यम् ? — सर्वं पाठ्यांशानुसारेण समासेनोपन्यसनीयम्। [1+1+8]

4. अधोलिखितेषु यथेच्छं **द्वयो**राङ्गलवाण्यां वङ्गभारत्यां वानुवादो विधेयः। [6×2]

क) अणुः पन्था विततः पुराणो

मां स्पृष्टोऽनुवित्तो मयैव।

तेन धीरा अपियन्ति ब्रह्मविदः

स्वर्गं लोकमित ऊर्ध्वं विमुक्ताः।।

ख) तस्मादेवंविच्छान्तो दान्त उपरतस्तितिक्षुः समाहितो भूत्वात्मन्येवात्मानं पश्यति सर्वमात्मानं पश्यति नैनं पाप्मा तरति सर्वं पाप्मानं तरति नैनं पाप्मा तपति सर्वं पाप्मानं तपति।

ग) अथ ह याज्ञवल्क्यस्य द्वे भार्ये बभूवतुर्मैत्रेयी च कात्यायनी च। तयोर्ह मैत्रेयो ब्रह्मवादिनी बभूव स्त्रीप्रज्ञैव तर्हि कात्यायनी। अथ ह याज्ञवल्क्योऽन्यद्वृत्तमुपाकरिष्यन्।

घ) स वा एष महानज आत्माऽमरोऽजरोऽमृतोऽभयो।

ब्रह्माभयं वै ब्रह्माभयं हि वै ब्रह्म भवति य एवं वेद।।

5. अधोलिखितयो**रेकस्य** प्रसङ्गोल्लेखपूर्वकं सरलसुरगिरा व्याख्या कार्या। [8]

क) अन्धं तमः प्रविशन्ति येऽविद्यामुपासते।

ततो भूय इव ते तमो य उ विद्यायां रताः।।

ख) येनाहं नामृता स्यां किमहं तेन कुर्याम्।

6. अधोलिखितयोः प्रश्नयो**रेकः** समाधेयः। [12]

क) मिताक्षरासनाथितयाज्ञवल्क्यसंहितानुसारमृणग्रहणपरिशोधविधिसम्बन्धो बन्धो बन्ध्यः। [12]

ख) को नाम व्यवहारः? कति तस्य पादाः? के ते? किं तेषां स्वरूपम्? किं सर्व एव व्यवहाराः पादचतुष्टयात्मकाः? — सर्वं मिताक्षरासहितयाज्ञवल्क्यसंहितानुसारं वर्णनीयम्। [2+1+1+6+2]

7. अधोलिखितयो**रेक**स्य सुरगिरा व्याख्या लेख्या। [7]

क) पश्यतोऽब्रुवतो भूमेर्हानिर्विंशतिवार्षिकी।

परेण भुज्यमानाया धनस्य दशवार्षिकी।।

ख) पितरि प्रोषिते प्रेते व्यसनाभिप्लुतेऽपि वा।

पुत्रपौत्रैर्ऋणं देयं निह्नवे साक्षिभावितम्।।

8. यथाभिमतं **द्वितयस्य** संक्षेपेण टिप्पणी रचनीया। [3×2]

प्राड्विवाकः, स्त्रीधनम्, उपनिधिः, प्रतिभूः।

9. यथेच्छ**मेकस्य** प्रश्नस्योत्तरं लेख्यम्। [10]

क) नव्यस्मृतिसाहित्ये रघुनन्दनस्यावदानमवलम्ब्य नातिदीर्घो बन्धो बन्ध्यः। [10]

ख) कामन्दकीयनीतिसारस्य शुक्रनीतिसारस्य च गुरुत्वं पर्यालोचनीयम्। [5+5]

10. अधस्तनेषु यत्किमपि विषय**त्रितय**मवलम्ब्य टीका रचनीयाः। [5×3]

क) पराशरसंहिता। ख) नारदस्मृतिः। ग) कात्यायनः।

घ) कामन्दकः। ङ) मन्वर्थमुक्तावली। च) मिताक्षरा।